**अथवा**

# PS/UM-I/6/96/19

## षष्ठपत्रम्

## व्याकरणम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 100**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(20×2=40)**

1. प्रत्याहारेषु इत्संज्ञकानां ग्रहणं कुतो न ?
2. स्वरितसंज्ञासूत्रं किम् ?
3. हकारस्य के बाह्यप्रयत्नाः ?

**अथवा**

यमवर्णः कः भवति ?

4. के प्रादयः ?
5. संहितासंज्ञासूत्रं लिखत।
6. षष्ठी स्थाने योगा इति सूत्रस्य कः अर्थः ?
7. 'स्थानेऽन्तरतमः' इति सूत्रे स्थानशब्दस्य कोऽर्थः ?

**अथवा**

ङिच्च इति सूत्रं कस्य सूत्रस्य अपवादः ?

8. सुद्ध्युपास्यः इत्यत्र संयोगान्तस्य लोपः कथं न भवति ?
9. लोपसंज्ञासूत्रं किम् ?

**अथवा**

तदन्तविधिः कुत्र न भवति ?



Scanned by CamScanner

10. 'अचोरहाभ्यां द्वे' इति सूत्रस्य किमुदाहरणम्?

11. गव्यूतिः इत्यत्र वान्तादेशविधायकं किम्?

12. पतञ्जलिः इत्यत्र कः सन्धिः?

13. आम्रेडित संज्ञासूत्रं लिखत।

14. इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च इति सूत्रस्य उदाहरणं किम्?

15. अप्लुतवदुपस्थिते इति सूत्रे उपस्थितशब्दस्य कोऽर्थः?

16. अमुकेऽत्र इत्यत्र अदसोमादिति प्रगृह्यसंज्ञा कथं न भवति?

17. 'शात्' इत्यनेन किं विधीयते?

**अथवा**

'तोः षि' इति कस्य निषेधः?

18. तन्मात्रम् इत्यत्र अनुनासिकविधायकं किम्?

19. संस्कर्ता इत्यत्र विसर्गस्य सत्वविधायकं किम्?

20. इसुसोः सामर्थ्ये इति सूत्रे सामर्थ्यं किम्?

**अथवा**

तन्त्रे + उक्तम् इत्यस्य सन्धिरूपं लिखत।

**ब. अधोनिर्दिष्टाः सर्वे प्रश्नाः समाधेयाः।** **(5×8=40)**

21. हलन्त्यम् इत्यत्र अन्योन्याश्रयदोषः कथं भवति? परिहारश्च कः?

**अथवा**

तुल्यास्यप्रयत्नं सवर्णम् इति सूत्रं व्याख्यात।



Scanned by CamScanner

22. वान्तो यि प्रत्यये इति सूत्रं सोदाहरणं व्याख्यात।

23. द्वित्वं लस्यैव कस्यैव नोभयोरुभयोरपि।

तवत्कारादिषु बुधैः बोध्यं रूपचतुष्टयम्॥

इति कारिकां ससन्दर्भं व्याख्यात।

**अथवा**

प्रष्ठौहः, अक्षौहिणी, प्रौढः, स्वैरः एतेषां सन्धिकार्यं ससूत्रं लिखत।

24. कथं तर्हि मदोदग्राः ककुद्मन्तः? इति पङ्क्तिं ससन्दर्भं व्याख्यात।

**अथवा**

गोऽग्रम्, गवाग्रम्, गो अग्रम् इति रूपत्रये सन्धिकार्यविशेषं लिखत।

25. पुमः खय्यम्परे इति सूत्रं सोदाहरणं व्याख्यात।

**स. एकः प्रश्नः समाधेयः।** (1×20=20)

26. स्थानिवद्भावेन द्वित्वनिषेधापादानपूर्वकं सुध्युपास्यः इत्यत्र रूपचतुष्टयं साधयत।

**अथवा**

'गुरोरनृतोऽनन्त्यस्याप्येककैस्य प्राचाम्', नश्छव्यप्रशान् इति सूत्रद्वयं व्याख्यात।

**अथवा**

'एङि पररूपम्' इति सूत्रं व्याख्याय पररूपविधायकानि वार्तिकानि सङ्गृह्य अर्थम् उदाहरणं च लिखत।



Scanned by CamScanner